**RAJA N L KHAN WOMEN'S COLLEGE (AUTONOMOUS)**

**GOPE PALACE, MIDNAPORE – 721102**

**Description of module:**

| | |
|---|---|
| Department | Sanskrit (UG & PG) |
| Subject | Sanskrit |
| Year & Semester | UG 1st Year & 2nd Sem |
| Paper Name & Code | Classical Sanskrit Literature (Poetry) & CC3 |
| Section Name & Unit | Section 'D': Nītiśatakam (Unit - II) |
| Module Name | विद्याप्रशंसा |
| Content Writer | Srimanta Bhadra<br>Asst. Professor, RNLKWC |

# विद्याप्रशंसा

## १. प्रस्तावना

क्रान्तदर्शी कविः भर्तृहरिः नीतिशतकमाध्यमेन अस्मान् जीवननीतिं बोधयति। समाजे केचन भवन्ति ये केवलम् अपरेषां दोषान् एव पश्यन्ति। कविः तु दोषगुणविवेकी भवति। अतः आदौः अनेकैः श्लोकैः मूर्खाणाम् अज्ञतां निन्दित्वा अधुना विद्यावतां विद्यां प्रशंसति कविः। समाजद्रष्टा कविः अस्माकं पुरतः जायमानान् वृत्तान्तान् उदाहरणरूपेण स्वीकरोति। येन वयम् अनायासेन अस्माकं दोषगुणान् जानीमः। ततः दोषान् वर्जयित्वा गुणान् आदाय वयं सफलीभवामः। अज्ञतां परित्यज्य विद्यायाः उपासनं विधाय वयं कृतकृत्या भवेम इति जीवनपाठम् अत्र पठामः।

## २. उद्देश्यानि

अमुं पाठं पठित्वा त्वं–

- विद्यावतां विद्याम् अपहर्तुम् ईश्वरोऽपि न समर्थः इति ज्ञास्यसि।
- बाह्याः अलङ्काराः मानवान् चिरं न शोभयन्ति इति ज्ञास्यसि।
- मनुजानां वाग्भूषणमेव चिरस्थायि भूषणम् इति ज्ञास्यसि।
- विद्या सकलभोगस्य यशसः सुखस्य च कारणम् इति ज्ञास्यसि।
- विद्याविहीनः मनुष्यः पुच्छविषाणहीनः पशुः भवति इति ज्ञास्यसि।

## ३. मूलपाठः

**अम्भोजिनीवननिवासविलासमेव**
**हंसस्य हन्ति नितरां कुपितो विधाता।**
**न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां**
**वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः॥ १८॥**

**केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला**

**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।**

**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**

**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥१९॥**

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**

**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**

**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं**

**विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः॥२०॥**

---

## ४. साम्प्रतं मूलपाठम् अवगच्छामः

**अम्भोजिनीवननिवासविलासमेव**

**हंसस्य हन्ति नितरां कुपितो विधाता।**

**न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां**

**वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः॥१८॥**

**भूमिका–** कविवरेण भर्तृहरिणा विरचितस्य शतकत्रयम् इति ग्रन्थस्य नीतिशतकात् श्लोकोऽयं गृहीतः। विद्यावतां विद्याम् अपहर्तुम् ईश्वरोऽपि न समर्थः इति विद्यामाहात्म्यं दर्शयति कविः।

**अन्वयः–** नितरां कुपितः विधाता हंसस्य अम्भोजिनीवननिवासविलासम् एव हन्ति, अस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिम् तु अपहर्तुम् असौ न समर्थः।

**अन्वयार्थः–** नितराम् – अतिशयेन कुपितः – क्रुद्धः विधाता – ईश्वरः हंसस्य – मरालस्य अम्भोजिनीवननिवासविलासं – पद्मवने क्रीडाजन्यम् आनन्दम् एव हन्ति – विनाशयति, अस्य – हंसस्य दुग्धजलभेदविधौ – नीरक्षीरविवेके प्रसिद्धां – बहुश्रुतां वैदग्ध्यकीर्तिं – नैपुण्यं तु अपहर्तुं – विनाशयितुं असौ – ईश्वरः न समर्थः – शक्तः इत्यन्वयार्थः।

**सरलार्थः**– क्रुद्धः विश्वेश्वरः हंसस्य पद्मवने कीडया जायमानम् आनन्दम् अपहर्तुं समर्थः अर्थात् ईश्वरेण प्रदत्तान् प्राणान् हर्तुम् ईश्वरः स्वयं समर्थः, परं हंसस्य जलदुग्धयोः पृथक्करणसामर्थ्यम् ईश्वरोऽपि स्वीकर्तुं न शक्नोति।

**तात्पर्यार्थः**– "गुणाः पूजास्थानं गुणिषु, न च लिङ्गं न च वयः" इति गुणस्य एव महान् समादरः अस्मिन् लोके लक्ष्यते। गुणहीनः च अस्मिन् संसारे न शोभते– "गुणहीना न शोभन्ते निर्गन्धा इव किंशुकाः" इति। अतः गुणार्जनं कुर्यात् अर्थात् सदसद्विवेकज्ञानस्य कारणं विद्याम् अर्जयेत्। विद्यावतः एव कीर्तिः। कीर्तेश्च विनाशः नास्ति– "कीर्तिर्यस्य स जीवति" इति। इमां कीर्तिम् अपहर्तुम् ईश्वरोऽपि न शक्तः। अयमेव भावः उपमाप्रयोगेण वर्णितः।

**व्याकरणविमर्शः**–

- अम्भोजिनीवननिवासविलासम् – अम्भोजिन्याः वनम् अम्भोजिनीवनम् इति षष्ठीतत्पुरुषः, तस्मिन् निवासः अम्भोजिनीवननिवासः इति सप्तमीतत्पुरुषः, तस्य विलासः इति षष्ठीतत्पुरुषः, तम् अम्भोजिनीवननिवासविलासम्।
- दुग्धजलभेदविधौ – दुग्धं च जलं च दुग्धजले इति द्वन्द्वः, दुग्धजलयोः भेदः दुग्धजलभेदः इति षष्ठीतत्पुरुषः, दुग्धजलभेदस्य विधिः दुग्धजलभेदविधिः इति षष्ठीतत्पुरुषः, तस्मिन् दुग्धजलभेदविधौ।
- वैदग्ध्यकीर्तिम् – विदग्धस्य भावो वैदग्ध्यम्, तस्य कीर्तिः वैदग्ध्यकीर्तिः, तां वैदग्ध्यकीर्तिम् इति षष्ठीतत्पुरुषः।

**अलङ्कारः**– अत्र निदर्शनालङ्कारः।

**छन्दः**– वसन्ततिलकं छन्दः। तल्लक्षणं हि– "ज्ञेयं वसन्ततिलकं तभजा जगौ गः" इति।

## पाठगतप्रश्नाः – १

१. कुपितो विधाता कस्य अम्भोजिनीवननिवासविलासं हन्ति?

२. अम्भोजिनीवनशब्दस्य कः अर्थः?

३. हंसस्य वैदग्ध्यकीर्तिः का भवति?

४. हंसस्य वैदग्ध्यकीर्तिम् अपहर्तुं कः न समर्थः?

५. कः जीवति?

---

**केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला**
**न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।**
**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते**
**क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्॥ १९॥**

**भूमिका–** कविवरेण भर्तृहरिणा विरचितस्य शतकत्रयम् इति ग्रन्थस्य नीतिशतकात् श्लोकोऽयं गृहीतः। अत्र कविः विद्यावतां वचनकलां प्रशंसति।

**अन्वयः–** केयूराः न, चन्द्रोज्ज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्कृताः मूर्धजाः न पुरुषं विभूषयन्ति। एका वाणी या संस्कृता धार्यते, (सा) पुरुषं समलङ्करोति। भूषणानि खलु क्षीयन्ते। वाग्भूषणं सततं भूषणम् इति अस्य श्लोकस्य अन्वयः

**अन्वयार्थः–** केयूराः – बाहुभूषणानि पुरुषं – मनुष्यं न विभूषयन्ति – अलङ्कुर्वन्ति, न चन्द्रोज्ज्वलाः – चन्द्रतुल्यनिर्मलाः हाराः – मालाः, न स्नानं – जलावगाहनं, न विलेपनं – चन्दनादिकं, न कुसुमं – पुष्पं, न अलङ्कृताः – प्रसादिताः मूर्धजाः – केशाः। एका वाणी – वाक् या संस्कृता – शुद्धा धार्यते (सा वाणी) पुरुषं – मनुष्यं समलङ्करोति – विभूषयन्ति। भूषणानि – आभरणानि खलु – निश्चयेन क्षीयन्ते – विनश्यन्ते (किन्तु) वाग्भूषणम् – वाणीरूपं भूषणं सततं – सदैव चिरस्थायि इति यावत् भूषणम् – आभरणम् इति अन्वयार्थः।

**सरलार्थः–** मनुष्यः अङ्गदैः, निर्मलैः हारैः, स्नानेन, चन्दनकर्पूरादिलेपनेन पूष्पैः सुचारुकेशैः चिरं सुशोभितः न भवति। यतोहि ते अलङ्काराः स्वल्पेन कालेन एव नश्यन्ति। केवलं गुणालङ्कारयुक्ताभिः शुद्धाभिः वाणीभिः एव चिरं शोभितो भवति।

**तात्पर्यार्थः**– अलङ्कारः द्वेधा सौन्दर्यम् उत्पादयति। एकः बाह्यम् अलङ्करोति, अपरः आभ्यन्तरम्। तत्र कङ्कणहारादयः बाह्यं शरीरम् अलङ्करोति, शरीरनाशे तेषामपि नाशः। आभ्यन्तरसौन्दर्यं हि गुणः सम्पादयति। तत्र गुणः च मरणोत्तरम् अपि जीवयति। वचनकलात्मकः गुणः हि अद्यापि कालिदासादीन् जीवयति। अत एव मम्मटेन उक्तम्– "भारती कवेर्जयति" इति। श्रूयते च – "एकः शब्दः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति" इति।

**व्याकरणविमर्शः**–

- चन्द्रोज्ज्वलाः – चन्द्रः इव उज्ज्वलः चन्द्रोज्ज्वलः, ते चन्द्रोज्ज्वलाः इति उपमानकर्मधारयः
- मूर्धजाः – मूर्धनि जायते यः सः मूर्धजः, ते मूर्धजाः इति उपपदतत्पुरुषः।

**अलङ्कारः**– अत्र स्वभावोक्तिः अलङ्कारः वर्तते। तल्लक्षणं हि साहित्यदर्पणे– "स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्" इति।

**छन्दः**– शार्दूलविक्रीडितं छन्दः। तल्लक्षणं हि– "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति।

## पाठगतप्रश्नाः – २

६. मूर्धजाः इति शब्दस्य कः अर्थः?

७. कानि खलु क्षीयन्ते?

८. किं पुरुषं समलङ्करोति?

९. किं सततं भूषणम्?

१०. अस्मिन् श्लोके किं छन्दः वर्तते?

---

**विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं**

**विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।**

**विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं**

**विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः॥२०॥**

**भूमिका**– कविवरेण भर्तृहरिणा विरचितस्य शतकत्रयम् इति ग्रन्थस्य नीतिशतकात् श्लोकोऽयं गृहीतः। अनेन श्लोकेन कविः विद्यां प्रशंसति।

**अन्वयः**– विद्या नाम नरस्य अधिकं रूपम्, प्रच्छन्नगुप्तं धनम्, विद्या भोगकरी, यशःसुखकरी, विद्या गुरूणां गुरुः, विद्या विदेशगमने बन्धुजनः, विद्या परं दैवतम्, विद्या राजसु पूजिता, न तु धनम्। विद्याविहीनः पशुः इति अस्य श्लोकस्य अन्वयः।

**अन्वयार्थः**– विद्या – ज्ञानं नाम नरस्य – मनुष्यस्य अधिकं – श्रेष्ठं रूपं – परिचयः (भवति), प्रच्छन्नगुप्तम् – अन्तःसुरक्षितं धनं – वित्तम्, विद्या भोगकरी – भोगस्य कारणम्, यशःसुखकरी – यशःसुखयोः निदानम्, विद्या गुरूणां – वन्द्यानां गुरुः – वन्द्यः, विद्या विदेशगमने – प्रवासयात्रायां बन्धुजनः – परमात्मीयः, विद्या पंर – श्रेष्ठं दैवतं – देवता, विद्या राजसु – नृपेषु पूजिता – समादृता, न तु धनं – वित्तम् (पूज्यते)। विद्याविहीनः – विद्याशून्यः (मनुष्यः) पशुः – पशुतुल्यः इति अन्वयार्थः।

**सरलार्थः**– विद्यया एव मनुष्यस्य यथार्थपरिचयः लभ्यते। विद्या अन्तःस्थं धनं चोरयितुम् अशक्यम् इत्यर्थः। विद्या निखिलभोगानाम् उत्सभूता। विद्यया एव निर्मलं यशः परमं सुखं च अवाप्यते। विद्यया एव गुरोः गुरुत्वं साध्यते। प्रवासे विद्या एव परमसहायिका। विद्या देवानामपि देवः, विद्याधनयोः मध्ये राज्ञैः धनमेव पूज्यते। विद्यारहितस्तु पुच्छविषाणहीनः पशुः।

**तात्पर्यार्थः**– "सा विद्या या विमुक्तये" इति श्रुतेः उद्घोषः। मुक्तेः कारणं भवति विद्या। मुक्तिः द्विधा – पारमार्थिकी व्यवहारिकी च। पारमार्थिकी मुक्तिस्तु ब्रह्मलाभेन भवति। व्यवहारिकी मुक्तिः भवति प्रतिष्ठा। प्रतिष्ठा च विद्ययैव भवति। तदुक्तं–

विद्या ददाति विनयं विनयाद् याति पात्रताम्।

पात्रत्वाद् धनम् आप्नोति धनाद्धर्मं ततः सुखम्॥ इति।

"विद्या रूपं कुरूपाणाम्" इति हि विद्यामाहात्म्यम्।

**व्याकरणविमर्शः**–

- भोगकरी – भोगं कारयति या सा भोगकरी इति उपपदतत्पुरुषः।
- यशःसुखकरी – यशःसुखे कारयति या सा यशःसुखकरी इति उपपदतत्पुरुषः।
- बन्धुजनः – बन्धुः च असौ जनः बन्धुजनः इति कर्मधारयः।
- विदेशगमने – विदेशे गमनम्, तस्मिन् विदेशगमने इति सप्तमीतत्पुरुषः।

**अलङ्कारः**– अत्र स्वभावोक्तिः अलङ्कारः वर्तते। तल्लक्षणं हि साहित्यदर्पणे– "स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्" इति।

**छन्दः**– शार्दूलविक्रीडितं छन्दः। तल्लक्षणं हि– "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" इति।

## पाठगतप्रश्नाः – ३

११.किं प्रच्छन्नगुप्तम् धनम्?

१२.गुरूणां गुरुः कः?

१३.विद्या कदा बन्धुजनो भवति?

१४.राजसु किं पूज्यते?

१५.राजसु किं न पूज्यते?

---

## उत्तराणि

१. हंसस्य। २. पद्मवनम्। ३. दुग्धजलभेदविधिः। ४. ईश्वरः। ५. कीर्तिः यस्य सः। ६. केशाः। ७. भूषणानि। ८. संस्कृता वाणी। ९. वाग्भूषणम्। १०. शार्दूलविक्रीडितम्। ११. विद्या। १२. विद्या। १३. विदेशगमने। १४. विद्या। १५. धनम्।

**Suggested Books:**

1. विष्णुदत्तशर्मा शास्त्री (व्या.), भर्तृहरिकृतनीतिशतकम्, विमलचन्द्रिकासंस्कृतटीका व हिन्दीव्याख्यासहित, ज्ञानप्रकाशन, मेरठ, संवत् २०३४।
2. ओमप्रकाश पाण्डेय (व्या.), भर्तृहरिकृतनीतिशतकम्, मनोरमा हिन्दीव्याख्यासहित, चौखम्बा अमरभारती प्रकाशन, वाराणसी, १९८२।
3. बाबूरामत्रिपाठी (सम्पा.), भर्तृहरिकृतनीतिशतकम्, महालक्ष्मी प्रकाशन, आगरा, १९८६।

*******